# Shri Radhakrishna Kavacham

# श्रीराधाकृष्णकवचम्

## Document Information

Text title : Radha Krishna Kavacham

File name : rAdhAkRRiShNakavacham.itx

Category : devii, devI, radha

Location : doc_devii

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail

Proofread by : Sivakumar Thyagarajan, PSA Easwaran

Description-comments : vishvanAthasAroddhAre mahAtantre

Latest update : March 14, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 14, 2020

*sanskritdocuments.org*

# श्रीराधाकृष्णकवचम्

ॐ श्रीगणेशाय नमः ।
श्रीभैरव उवाच ।
अधुना कथयिष्यामि राधकृष्णस्य भैरवि ।
कवचं मन्त्रगर्भं तु वज्रपञ्जरसंज्ञकम् ॥ १॥

रहस्यं सर्वदेवानां मर्त्यानां च विशेषतः ।
अस्यैव धारणाच्चाहं सर्वज्ञोऽस्मि महेश्वरि ॥ २॥

यद्धारणात्ससर्जादौ ब्रह्मा सृष्टिं पृथग्विधाम् ।
यं धृत्वा त्रिदशेन्द्रत्वं प्रालेभे पाकशासनः ॥ ३॥

व्योम्नि प्रकाशते भानुर्नित्यं यद्धारणात्प्रिये ॥

सर्वप्राणिनियन्तापि बभूव धर्मराड्यतः ॥ ४॥

धनाध्यक्षः कुबेरोऽभूदस्य सन्धारणादपि ॥

यस्मिन्धृते पाशहस्तः सलिलेशो बभूव ह ॥ ५॥

ये ये पूर्वं दानवेन्द्राः प्रबलाः कर्मणापि च ॥

अस्यैव धारणात्सर्वे ते ते नीता मृतिं मया ॥ ६॥

शक्नुयात्को गणयितुं माहात्म्यमस्य चेश्वरि ।
विनानेन न सिद्धिः स्यादिह लोके परत्र च ॥ ७॥

कवचं यं समाबध्य मन्त्रजापं समाचरेत् ।
तेनैव मन्त्रसिद्धिश्च जायते परमाद्भुता ॥ ८॥

कवचस्यास्य देवेशि ब्रह्मा प्रोक्तो मुनिस्तथा ।
गायत्रं छन्द इत्युक्तं श्रीराधाप्रियवल्लभः ॥ ९॥

देवतात्र परं बीजं मायायाः परमेश्वरि ।

रमा शक्तिः कामराजबीजं कीलकमीश्वरि ॥ १०॥

चतुर्वर्गफलावाप्तौ विनियोगः प्रकीर्तितः ॥ ११॥

अथ ध्यानम् ॥

ध्यानं वक्ष्ये महादेवि श्रीराधामाधवस्य च ।
यज्ज्ञात्वा मन्त्रवित्प्राज्ञः सिद्धिं प्राप्नोति चैश्वरीम् ॥ १२।
श्रीमदुद्यानकल्पद्रुमविटपलसत्स्वर्णदोलाधिरूढं
श्रीराधां रिङ्खमाणं कटितटविलसत्क्षुद्रघणटारवाढयम् ।
वंशीरन्ध्रान्तरं श्रीमुखकमलगलद्वायुना पूर्यमाणं
राधाप्रेक्षणहर्षफुल्लनयनं वन्दे सदा माधवम् ॥ १३॥

श्यामं पूर्णेन्दुवदनं वराभयलसत्करम् ।
राधाऽऽश्लिष्टतनुं कान्तं मुक्तिदं माधवं भजे ॥ १४॥

ॐ ह्रीं मस्तकं माधवोऽव्याच्छ्रीं श्रीकृष्णो ललाटकम् ।
पायान्नेत्रे सदा पातु क्लीं गोविन्दः समन्ततः ॥ १५॥

श्रीराधावल्लभः पातु नासां मे भक्तवत्सलः ॥

दामोदरो मुखं पातु वैकुण्ठः पातु कण्ठकम् ॥ १६॥

वक्षःस्थलं सदा पायान्मम श्रीवत्सलाञ्छनः ॥

चतुर्भुजो भुजौ पातु हस्तौ रक्षतु केशवः ॥ १७॥

पार्श्वौ मम सदा पातु पूर्णचन्द्रनिभाननः ॥

हृदयं मुकुन्दः पायान्मे कुक्षिं विश्वम्भरो मम ॥ १८॥

पृष्ठं पार्थसखः पातु नाभिं पञ्चजनाभियुक् ॥

गुह्यं मे रक्षतु श्रीमान्सर्वतोविष्टरश्रवाः ॥ १९॥

शिश्नं श्रीशः सदा पायात्कटिं कैटभजित्तथा ॥

ऊरू त्रिविक्रमः पातु जानुनी च जनार्दनः ॥ २०॥

जङ्घे गदाधरः पातु गुल्फौ मे गरुडध्वजः ॥

पादौ सहस्रपात्पातु राधेशः सकलं वपुः ॥ २१॥

इन्द्रो मां पूर्वतः पातु वह्निर्वह्नौ सदा मम ॥

यमो दक्षिणतः पातु नैर्ऋते निर्ऋतिस्तथा ॥ २२॥

वरुणः पश्चिमे पायाद्वायव्येऽव्यात्सदागतिः ॥

कुबेर उत्तरे पायादैशान्यामीश्वरोऽवतु ॥ २३॥

दशदिक्षु सदा पातु श्रीराधावल्लभः प्रभुः ॥

प्रभाते पातु श्रीकृष्णो मध्याह्ने गोपवल्लभः ॥ २४॥

सायं राधाप्रियः पातु प्रदोषे गोपतिप्रियः ॥

अर्धरात्रे सदा पातु प्रद्युम्नो भगवान्मम ॥ २५॥

निशान्ते माधवः पातु विष्वक्सेनस्तु सर्वदा ॥

रणे राजभये द्यूते विवादे शत्रुसङ्कटे ॥ २६॥

ॐ ह्रीं श्रीं क्लीं सदा पातु श्रीराधावल्लभः प्रभुः ॥ २७॥

ॐ ह्रीं श्रीं गरुडध्वजः सगतिमान्पायाद्रणे सङ्कटे
श्रीकृष्णो भगवान्ममारिनिवहान्विध्वंसयेत्तत्क्षणात् ।
गोविन्दोऽवतु मां सदा हरिभयाद्राधाप्रियो माधवो
मां पायाद्विपदः श्मशानगचरोऽव्याद्भयात्सर्वतः ॥ २८॥

(तोयौघाज्ज्वलनोद्भवादरिभयान्माम्पातु राधेश्वरः)।
इतीदं कवचं दिव्यं वज्रपञ्जरकाभिधम् ॥

सर्वसौभाग्यजननं सुखदं सन्ततिप्रदम् ॥ २९॥

लक्ष्मीसंवर्धनं देवि परमार्थरसायनम् ॥ ३०॥

मन्त्रगर्भपरं साररहस्यं त्रिदिवौकसाम् ।
त्रिसन्ध्यं यः पठेन्नित्यं कवचं प्रयतः पुमान् ॥ ३१॥

स याति परमं धाम वैष्णवं साधकोत्तमः ।
दशवारं पठेद्यस्तु रतादौ वैष्णवोत्तमः ॥ ३२॥

विष्णुभक्तिरतं पुत्रं प्राप्नोति कुलदीपकम् ॥

रविवारे लिखेद्यस्तु तिष्यर्क्षे साधकोत्तमः ॥ ३३॥

गन्धाष्टकेन विमले भूर्जे रन्ध्रविहीनके ॥

लिखित्वा रक्तवस्त्रेण संवेष्ट्य स मनुं जपन् ॥ ३४॥

सुवर्णगुटिकामध्ये स्थापयित्वा विधानतः ॥

मूर्ध्नि तान्धारयेद्धीमान् श्रीराधावल्लभं स्मरन् ॥ ३५॥

रणे रिपूञ्जयत्याशु वादे स्तुत्यो भविष्यति ॥

नारीं रूपवतीं साध्वीं लभते नात्रसंशयः ॥ ३६॥

वन्ध्या वा काकवन्ध्या वा मृतवत्सापि याङ्गना ॥

सा बध्नीयात्कण्ठदेशे लभेत्पुत्रांश्चिरायुषः ॥ ३७॥

गुरूपदेशतो धृत्वा गुरुं ध्यात्वा मनुं जपन् ॥

वर्णलक्षपुरश्चर्याफलं प्राप्नोति साधकः ॥ ३८॥

बहुनात्र किमुक्तेन कवचस्यास्य पार्वति ॥

विनानेन न सिद्धिः स्यान्मन्त्रस्यास्य महेश्वरि ॥ ३९॥

गोप्याद्गोप्यं महादेवि श्रीराधाकृष्णसम्भवम् ।
वज्रपञ्जरकं वर्म गोपनीयं महेश्वरि ॥ ४०॥

दीक्षिताय कुलीनाय शिष्याय गुणशालिने ।
दातव्यं श्रद्धानाय कृष्णभक्तिरतायच ॥ ४१॥

अभक्ताय न दातव्यं कुचैलाय दुरात्मने ॥

क्रूराय परशिष्याय शठाय परमेश्वरि ॥ ४२॥

रहस्यं सर्वसाराढ्यं गोपनीयं स्वयोनिवत् ॥ ४३॥

॥ इति श्रीविश्वनाथसारोद्धारे महातन्त्रे
श्रीराधाकृष्णकवचं समाप्तम् ॥

Entered by Sivakumar Thyagarajan

Proofread by Sivakumar Thyagarajan, PSA Easwaran

*Shri Radhakrishna Kavacham*

pdf was typeset on March 14, 2020

Please send corrections to *sanskrit@cheerful.com*